# उपसंहारः

# उपसंहारः

प्रस्तुतोऽयं शोधप्रबन्धः सप्ताऽध्यायेषु विभक्तः। प्रबन्धस्यास्य भूमिका सुगवेषणात्मिका वर्त्तते। तत्र भूमिकायां योगस्य महत्त्वम्, योगस्य उद्देश्यम्, योगस्य उपादेयता, अमृतविद्यायोगः, योगदर्शनस्य परम्परानिर्देशनम् श्रीकृष्णवल्लभाचार्यस्य व्यक्तित्वं कृतित्त्वञ्च वर्त्तते।। प्रस्तुतोऽयं शोधप्रबन्धः शोधस्योद्देश्यपरको वर्त्तते। यतोहि ये सिद्धान्ताः अन्येषु यौगिकग्रन्थेषु नैव प्राप्यन्ते ते स्वामिनारायणभाष्ये दृष्टिगोचराः भवन्ति। तेषां सिद्धान्तानां विवेचनमत्र मया शोधप्रबन्धे प्रतिपाद्यते। स्वामिनारायणभाष्यस्य प्रतिपादनशैली भिन्ना वर्त्तते। यतोहि योगाचार्यैरुक्तं आत्यन्तिकदुःखत्रयाऽत्यन्ताभावविशिष्टपरमात्मस्वरूपशरणाऽवाप्तिरूपा मुक्तिः। तेन प्रतीयते यत् स्वामिनारायणभाष्ये योगस्य नूतनाः सिद्धान्ताः सन्ति। श्रीमद्भगवद्गीतायां बहवः श्लोकाः योगसिद्धान्तप्रतिपादिकाः सन्ति। तेषां नूतनरीत्या विवरणं स्वामिनारायणभाष्यकारेण कृतम्।

**प्रयाणकाले मनसाचलेन बुद्ध्या युक्तो योगबलेन नैव।**

उक्तस्थले मनसाचलेन इत्यस्य अर्थः क्रियते वशीकारसंज्ञकवैराग्यत्त्वम्, बुद्ध्या युक्तः इत्यनेन तत्त्वज्ञानवत्त्वम्, योगबलेन इत्यनेन योगधर्मवत्त्वचोक्तम्, इत्थं बहूनि स्थलानि सन्ति यत्र योगसिद्धान्तस्य नूतना व्याख्या श्रीकृष्णवल्लभाचार्येण कृता।

भारतीयदर्शनस्य ये सिद्धान्ताः प्रसिद्धाः सन्ति तेषामतिगूढं तत्त्वं पूर्वपक्षरूपेण अस्मिन् भाष्ये निरूपितं वर्त्तते। तेषामपि दिग्दर्शनं मम शोधप्रबन्धे वर्त्तते। योगदर्शनस्य ये पदार्थाः सन्ति तेषामतिगूढं स्वरूपमस्मिन् भाष्ये वर्त्तते। अस्य भाष्यस्य विस्तृतं बहूनां सिद्धान्तानां प्रतिपादनं विभूतिपादे एव मया कृता। शोधप्रबन्धेनानेन योगदर्शनस्य नूतनतथ्यम् अवगतम्। कतिपयतत्त्वानां योगदर्शनस्वीकृतानां नवीना व्याख्या कृता। प्रबन्धस्याऽस्य प्रथमाऽध्याये वेदेषु योगः उपनिषत्सु योगः, महाभारते योगः, पुराणेषु योगः, श्रीमद्भगवद्गीतायां योगश्चेत्यादयः प्रतिपादिता। यद्यपि वेदेषु योगः स्पष्ट्तया दृग्गोचरो न भवति परं वेदाः एव सर्वासां विद्यानां मूलभूताः इति स्वीक्रियते। तान् आधारीकृत्य सर्वविद्यानां प्रचारप्रसारश्चाऽभूत्। अभ्युदयनिःश्रेयससिद्धिः 'वेदोऽखिलो धर्ममूलम्' इति वचनानुसारं वर्तमाने जगति यदकिञ्चिद अवलोक्यते तत्सर्वस्याधारामूलाः वेदाः।

**न वेदशास्त्रादन्यत्तु किञ्चिच्छास्त्रं हि विद्यते।**

**निः सूतं सर्वशास्त्रं तु वेद शास्त्रात्सनातनात्।।**

प्राचीनसाहित्ये सर्वप्रथमे ऋग्वेदे योगाद् ऋते नैव किमपि यज्ञः कर्मः सिद्यते। स च योगः चित्तवृत्तीनां निरोधः।

अथर्ववेदे तस्मै इन्द्रमूत्तर्यः सखायः योगे प्रवृत्तं सन् पुनः पुनः यज् कर्मणि संलग्नः स्याम्।

**योगे योगे तवस्तरं वाजे वाजे हवामहे। सखाय इन्द्रमूर्तये।**

कथनस्याऽस्य तात्पर्यमिदमस्ति वेदेषु अनेकेषु स्थलेषु योगशास्त्रस्य यमनियमयो: शिक्षा प्राप्यते। अतएव वेदा: एव भारतीयवैदिकवाङ्मयस्य प्राणा:।

अध्यायेऽस्मिन् उपनिषदत्सु योगसिद्धान्तानां प्रतिपादनं मया क्रियते। उपनिषद् प्रकरणे योगस्वरूपम्, साधनाविधि:, योगाङ्गानां योगोपयोगीपालनीयानां यमनियमानां वर्णनमस्ति। योगशिखोपनिषदि योगस्य परिभाषा अस्ति। प्राणापानयोश्च एकता सत्त्वरजरुपी कुण्डलिने शक्ति: स्वरेतसरुपी च आत्मतत्त्वस्य मेलनं, सूर्यचन्द्रयो: मेलनं एवं जीवात्मपरमात्मनयो: मेलनं योग:।

कठोपनिषदि योगस्य परिभाषाऽस्ति। यदा पञ्चइन्द्रियाणि मनसा सह स्थिराणि भवन्ति बुद्धिरपि च काऽपि न चेष्टयति सा गति: परमागति: वर्त्तते। इन्द्रियाणां स्थिरधारणा एव योगस्य परमाऽवस्थाऽस्ति। एनां स्थितिं प्राप्य योगी प्रमादरहितो भवति।

**यदा पंचावतिष्ठन्ते ज्ञानानि मनसा सह।**

**बुद्धिश्च विचेष्टति तामाहु: परमां गतिम्।।**

**तां योगमिति मन्यते स्थिरामिन्द्रिय: धारणाम्।**

**अप्रमत्तस्तदा भवति योगी ही प्रभवाप्ययौ।।**

योगतत्त्वोपनिषदि यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-भ्रूमध्यमे श्रीहरिं ध्यानं, समाधे:, साम्यावस्थाञ्चाष्टाङ्गयोगमुच्यते।

**यमश्च नियमश्चैव आसनं प्राणसंयम:, प्रत्याहारो धारणा च ध्यानं भ्रूमध्ये**

**हरिम्। समाधिः समतावस्था साष्टाङ्गो योग उच्यते।**

अमृतनादोपनिषदि प्रत्याहारः, ध्यानं, प्राणायामः, धारणा, तर्कः समाधिश्च षडङ्गोः योगः स्वीक्रियते।

**प्रत्याहारस्तथा ध्यानं प्राणायामोऽथ धारणा।**

**तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते।।**

इत्थं मया विभिन्नप्रकारेण नैकरीत्या नैकविधा च योगतत्त्वानां वर्णनं प्रतिपादितम्। अध्यायेऽस्मिन् महाभारते योग इति मया प्रतिपादितम्। यथा महाभारते शान्तिपर्वणि व्यासदेवेन शुकदेवं प्रति योगाभ्यासद्वारा परमात्मप्राप्तिवर्णनम् अनेन प्रकारेण कृतम्। तथा योगिनः कृते साधनायां यत् वर्जनीयम् उपेक्षणीयं च भवति तदपि सर्वं निरूपितं येन साधनामार्गे अन्तरायाः विघ्नाः वा न भवेयुः। तथा च इन्द्रियनिग्रहं तत्र परमावश्यकम्। एवमेव ज्ञानेन्द्रियाणां नियन्त्रणं, मनसश्च चंचलत्वात् तस्यापि निग्रहं इन्द्रियैः सह अवश्यमेव विधेयम्। तेनैव योगी आत्मबलं अर्जतुं शक्नोति। ब्रह्मसाक्षात्काराधिकारी च भवितुं शक्नोति।

यमनियमादीनां योगाङ्गानां सम्यगभ्यासपरिपालनपूर्वकं यां साधनां कुर्वाणो योगी यथाशीघ्रं सर्वत्र समदृष्टिभावं प्राप्य कर्मफलान् उल्लंघ्य षण्मासाभ्यन्तरे परब्रह्मणः परमात्मनः वा साक्षात्कारं लभते। अस्मिन्नेव पर्वणि त्रिपंचाशताधिकद्विशततमेऽध्याये व्यासदेवेन शुकदेवं प्रति स्थूलसूक्ष्मकारणस्य शरीरत्रयभिन्नस्य जीवात्मनः परमात्मनश्च साक्षात्कारसाधनायाः प्रकारा उपदिष्टाः। शरीरतत्त्वज्ञाः जितेन्द्रियाः

योगिनः स्थूलशरीरेभ्यः पृथक् भूतसूक्ष्मलिङ्गशरीरसहितं जीवात्मानं सूक्ष्मबुद्धया प्रत्यक्षं कुर्वन्ति।

मोक्षपर्वणि षोडशाधिकत्रिशततमाऽध्याये योगस्य विस्तृतं वर्णनं उपलभ्यते। पर ब्रह्मणः प्राप्तिरूपायरूपेण महर्षिणा याज्ञवल्केन जनकं प्रति योगसाधनाया उपदेशः कृतः। तत्रैव- ''नास्ति सांख्यसमं ज्ञानं नास्ति योगसमं बलम्'' इति प्रतिपादितम्। उभयोश्च एकमेव लक्ष्यं तच्च अमृतपदप्राप्तिः जन्ममृत्युचक्रस्य निवृत्तिश्च। अस्मिन्नैवाध्याये समाधिनिष्ठयोगयुक्तपुरूषस्य लक्षणानि निरूपितानि।

**नास्ति सांख्यसमं ज्ञानं नास्ति योगसमं बलम्।**
**तावुभावेकचर्यौतावुभावनिधनौ स्मृतौ।।**

अनेन प्रकारेण मया शोधप्रबन्धेऽस्मिन् समग्रे महाभारते प्रतिपादित योगसाधनायाः विविधप्रकाराः तथा आत्मसाक्षात्कारो परमोपादेयता निरूपिता। अत्रायमभिप्रायः यत् योगमार्गेणैव परमम् अव्ययपदं प्राप्तुं शक्यते।

प्रबन्धेऽस्मिन् प्रथमाऽध्याये पुराणेषु योगः मया प्रत्यपादि। यद्यपि सर्वेषु पुराणेषु योगतत्त्वानि उपस्थापितानि वर्त्तन्ते तथापि अत्र केचन् पुराणानां संङ्केतो विहितः। यथा श्रीमद्भागवतपुराणम्, विष्णुपुराणम्, शिवपुराणम्, अग्निपुराणम्, श्रीमद्देवीभागवतपु-राणञ्चेति। श्रीमद्भागवतमहापुराणे यमनियमानां वर्णनं प्राप्यते। विष्णुपुराणेऽपि अष्टाङ्गयोगानां वर्णनं प्राप्यते। यथा - यमस्वरूपम् -

**ब्रह्मचर्यमहिंसा च सत्यास्तेयापरिग्रहान्।**

**सेवेत योगी निष्कामो योग्यतां स्वं मनो नयन्।।**

नियमस्वरूपम् –

**स्वाध्यायशौचसंतोषतपांसि नियतात्मवान।**

**कुर्वीत ब्रह्मणि तथा परस्मिन्प्रवणं मनः।।**

भागवतपुराणस्य द्वितीयाऽध्याये आसनस्य वर्णनं प्राप्यते –

**गृहात् प्रव्रजितो धीरः पुण्यतीर्थ जलाप्लुतः।**

**शुचौ विविक्त आसीनो विधिवत् कल्पितासने।।**

शिवपुराणे प्राणायामस्वरूपम् –

**अगर्भश्च सगर्भश्च प्राणायामो द्विधा स्मृतः।**

**जपध्यानविनागर्भः सगर्भस्तत्समन्वयात्।।**

**अगर्भाद् गर्भ संयुक्तः प्राणायामः शताधिकः।**

**तस्मात् सगर्भ कुर्वन्ति योगिनः प्राणसंयमम्।।**

अग्निपुराणे प्रत्याहारस्वरूपम् –

**इन्द्रियाणि प्रसक्तानि प्रविश्य विषयोदधौ।**

**आहृत्य यो निगृह्णाति प्रत्याहारः स उच्यते।।**

देवीभागवत-महापुराणस्य सप्तमस्कन्धे हिमालयदेवीसंवादे धारणायाः स्वरूपं निगदितमस्ति। तद्यथा –

धारणं प्राणमरूतो धारणेति निगद्यते।

समाहितेन मनसा चैतन्यान्तरवर्तिना।।

अग्निपुराणे चिन्तार्थकस्य ध्यैयं धातोर्व्यापाररूप: विष्णवादिदेवतानां मुहुर्मुहुश्चिन्ता आनाक्षिप्तेन मनसा कृता ध्यानं कथितमस्ति।

ध्यै चिन्तायां स्मृतो धातुर्विष्णुचिन्ता मुहुर्मुहु:।

अनाक्षिप्तेन मनसा ध्यानमित्यभिधीयते।।1।।

मुनियो ध्यानान्तरं जीवात्मपरमात्मनोर्नित्यं समत्वभावनामेव समाधिं कथितवन्त: इदं देवीभागवतपुराणे कथितमस्ति।

समत्वभावना नित्यं जीवात्मपरमात्मनो:।

समाधिमाहुर्मुनय: प्रोक्तमष्टाङ्गलक्षणम्।।

इत्थं पुराणेषु योगतत्त्वानां वर्णनं यथा यथा मया प्राप्यते तत् संक्षिप्तेन अत्र लिखितम्।

अध्यायेऽस्मिन् श्रीमद्भगवद्गीतायां योगस्वरूपम् मया प्रतिपादितम्। गीताया: प्रतिऽध्याये योगस्वरूपं विद्यते। तत्र योगस्य विभन्नानि प्रकाराणि, योगस्वरूपं, साधनाया: विधि: योगफलं चोपदिष्टम्। गीतायां भक्तिकर्मज्ञानयोगानां समुच्चय:। सम्पूर्णा गीता कर्मयोगभक्तियोगज्ञानयोगविभागेन त्रिधा विभज्यते। गीतायां द्वितीयाऽध्याये व्यवसायात्मिकां बुद्धिं विहाय स्थिराया: निश्चयात्मिकाया: वा बुद्धे: उपादेयत्वं निरूपितम्। अयुक्तस्य बुद्धियोग: न संभवति। अतएव सुखार्थी योगाभ्यासं

कुर्यात्। बुद्धियोगेन शाश्वतसुखं शान्तिः वा प्राप्तुं शक्यते। अस्मिन्नेवाऽध्याये समाधिस्थ स्थितप्रज्ञस्य स्वरूपस्य स्थितेश्च वर्णनं प्राप्यते। तृतीये चतुर्थे च अध्याये कर्मस्वरूपं कर्मणः बन्धनाशोपायः इत्यस्य विस्तृतं वर्णनं लभ्यते। योगसमाधिना एव कर्मबन्धनानि छिद्यन्ते संशयानां च नाशो जायते। आत्मवतः योगिनः कर्माणि न निबध्नान्ति। पञ्चमाऽध्याये विजितात्मा जितेन्द्रियः विशुद्धात्मा योगी योगयुक्तो भूत्वा कर्माणि कुर्वन्नपि न कर्मफलैः बध्यते इति प्रतिपादितम्। षष्ठाऽध्यायेः ध्यानयोगः इति नाम्ना प्रसिद्धः। अस्मिन्नध्याये योगस्य विस्तृता चर्चा प्राप्यते। ध्यानयोगविधिः युक्ताहारविहारः आत्मसंयमः इत्येतेषां तत्त्वानां महत्त्वं प्रदर्शितम्। योगस्य उपायभूतौ अभ्यासवैराग्यस्य च उपादेयता प्रतिपादिता। दशमेऽध्याये भगवता सङ्केतिता यत् – ''प्रीतिपूर्वकम् भजतां साधकानां बुद्धियोगं ददामि येन ते मामुपयान्ति'' इति। अस्मिन्नेवाऽध्याये भगवतः विभूतीनां विस्तरेण वर्णनम् उपलभ्यते। एकादशाऽध्याये श्रीकृष्णेन विश्वरूपं प्रदर्श्य निजयोगैश्वर्यस्य परिचयो दत्तः।

द्वादशाऽध्याये भक्तियोगस्य निरूपणं लभ्यते। योगदर्शने वीतरागविषयं वा चित्तम् इत्युक्त्वा वीतरागिणां ध्यानेन समाधिः लभ्यते इति प्रतिपादितम्। त्रयोदशाध्याये सांख्ययोगस्य प्रकृतिपुरूष इति तत्त्वद्वयस्य विस्तृता चर्चा लभ्यते। साधनायाः दृष्टया अयमध्यायोऽतीव महत्वपूर्णः। अस्मिन्नध्याये क्षेत्र क्षेत्रज्ञस्य च विभाजनं कृतम्। चतुर्दशाऽध्याये प्रकृतिजन्यगुणत्रयाणां विस्तृतं वर्णनं प्राप्यते। एते गुणा अव्ययं देहिनं निबध्नन्ति। सत्त्वरजस्तमसां स्वरूपं तथा तेषां विवृद्धे विभिन्नानि फलानि

निरूपितानि। पञ्चदशाऽध्याये एतेषां त्रयाणां गुणानामुच्छेदनार्थमेव असंगशास्त्रादि विविधोपायानां प्रतिपादनं वर्तते। योगिनः शरीरस्थं सूक्ष्मतमं तत्त्वं उत्क्रामन्तं स्थितं भुञ्जानं वा ज्ञानचक्षुषा पश्यन्ति। षोडशाऽध्याये दैवी सम्पदः आसुरी सम्पदश्च सम्यक् विवेचनं वर्तते। तयोः दैवीसम्पद् विमोक्षाय कल्पते आसुरीसम्पदश्च बन्धाय इति। योगदर्शनेऽपि क्लिष्टाक्लिष्टसंस्काराणां निरूपणं लभ्यते। सप्तदशाऽध्याये सात्त्विकराजसतामसभेदेन श्रद्धात्रयस्य विवेचनं कृतम्। प्रवृत्तिभेदेश्च त्रिविधाहारस्य वर्णनं प्राप्यते। साधकाय परमोपादेय शरीरं वाङ्मयं मानसमिति त्रिविधतपसां वर्णनं लभ्यते।

अष्टादशाऽध्याये कर्मफलत्यागस्य महत्वं निरूपितम्। अनिष्टम्, इष्टम्, मिश्रितं च कर्मणां फलमत्रप्राप्यते। योगदर्शनेऽपि कर्माशुक्लाकृष्णं योगिनः त्रिविधमितरेषाम् इति प्रतिपादितम्। अस्मिन्नध्याये योगसाधकानां कृते पालनीयावश्यकतत्त्वानामपि संकेतः लभ्यते। एतेषु एकान्तसेवनं मिताहारः, वैराग्यम्, अनहंकारः, कामक्रोधपरिग्रहादीनां त्यागः इत्येते मुख्याः सन्ति। एतेषां सम्यक् पालनेन योगी शान्तो, निर्ममो भूत्वा ब्रह्मभूपाय कल्पते।

इत्थं मया स्वमत्यानुसारेण शोधदृष्ट्या गीतायां यत्र तत्र अमृततत्त्वं प्राप्यते तत् संक्षिप्तेन शोधप्रबन्धेऽस्मिन् प्रतिपादितम्।

शोधप्रबन्धस्यास्य द्वितीयाऽध्याये योगस्वरूपविमर्शः मया प्रतिपादितः। तत्र पातञ्जलयोगदर्शने योगस्वरूपं प्रतिपादितं तमेवाधारिकृत्य लिखितम्। यथा

योगशब्दस्योत्पत्ति। योग इति शब्दः **युज् समाधौ** इति धातोः घञ् प्रत्यये जाते सति निष्पन्नो भवति। पाणिनीयव्याकरणानुसारेण **युजिर् योगे, युज् संयमने** इति द्वाभ्यां धातुभ्यामपि योगशब्दः व्युत्पाद्यते। अत्र युज् समाधौ इत्यर्थ एव योगस्य प्रयोगोऽभीष्टः।

"अथ योगानुशासनमिति" प्रथमसूत्रानन्तरं द्वितीयं सूत्रं "योगश्चित्तवृत्तिनिरोधः" इति व्यलिखित् तत्परिभाषानुसारं चित्तवृत्तीनां निरोधकः क्रियाविशेषो योगः प्रोक्तोऽस्ति। चित्तं खलु क्षिप्तम्, मूढम्, विक्षिप्तम्, एकाग्रम् निरूद्धञ्चेति पञ्चविधं भवति। चित्तस्य तत्तदवस्थाप्रापिकाभूमो भवति। तत्र विक्षिप्ते चेतसि विक्षेपगणिभूतः समाधिर्नयोगपक्षे प्रवर्तते। एकाग्रे चेतसि यथाभूतोऽर्थः प्रतीयते, क्लेशाश्च क्षीयन्ते, कर्मबन्धनानि च शिथिलानि भवन्ति। निरोधं च समभिमुखं करोति। स खलु सम्प्रज्ञातो योगः, अयमेव वितर्कानुगतः विचारानुगतः, आनन्दानुगतः, अस्मितानुगश्चेति चतुर्विधः। सर्वासां वृत्तीनां निरोधे सति असम्प्रज्ञातनामको द्वितीयो योगः। अयं योग एव समाधिशब्देनोच्यते योगः समाधिरिति।

अध्यायेऽस्मिन् स्वामिनारायणभाष्यमाश्रित्य अष्टानामङ्गानां सामान्यप्रत्यालोचनम् इति मया प्रवर्तितम्। पातञ्जलयोगे यथा अष्टानामङ्गानां वर्णनं वर्त्तते तथैव स्वामिनारायणभाष्ये वर्णनं नास्ति। अत्र भाषा शैली भिन्ना एव। यमनियमानां संख्या पञ्च पञ्च एव सन्ति। परन्तु भाष्येऽस्मिन् आसनानि त्रयधिकनवति संख्याकानि समुपलभ्यन्ते। तेषां आसनानां नामानि पृथक्-पृथक् रूपेण वर्त्तन्ते।

प्राणायामविषयेऽपि आचार्यैरूक्तं आसनजये सति धौत्यादिषट्कर्मजये च सति, प्राणायामः सिञ्चति, प्राणायामलक्षणन्तु –'श्वासप्रश्वासयोर्गतिविच्छेद' इति तत्र श्वासो नाम बाह्यस्य वायोराचमनम्, प्रश्वासो नाम कौष्ठ्स्य वायोर्निसारणम्, तयोर्या गतिः प्रचलनम्, तस्य विच्छेदः प्रतिबन्ध इति। यत्र बाह्यो वायुराचम्याऽन्तर्धार्यते रेचके, तत्रापि श्वासप्रश्वासयोर्गतिविच्छेद इति, कुम्भकेऽपि तथा गतिविच्छेद इति।

स्वामिनारायणभाष्ये प्रत्याहारस्य स्वरूपं प्रतिपादितमस्ति मोहनीयरञ्जनीयकोपनीयैः स्वस्वविषयैर्न संप्रयुज्यते चित्तं यदा तदेन्द्रियान्तःकरणान्यपि न संप्रयुज्यते विषयैः, अतएव चित्तं स्वस्वरूपेऽवतिष्ठते, तदानीमिन्द्रियाण्यपि चित्तेऽभिनिवेशन्तेऽतश्चित्तस्वरूपाकारत्वमिन्द्रियाणां भवति, य चायं प्रत्याहार इति, प्रत्याह्रियन्ते विषयेभ्य इन्द्रियाणि यत्र कर्मणि इति।

महर्षिपतञ्जलिना प्रत्याहारस्य विषये कथितमस्ति। तत्र स्वविषयाणां सर्वथाऽप्रयोगे चित्तस्य स्वरूपानुकार इव इन्द्रियाणां प्रत्याहारः कथितः।

धारणास्वरूपविषये आचार्यैः प्रतिपाद्यन्ते धारणायामेव षट्चक्राणां स्थानमस्ति। एतेषां चक्राणां सूक्ष्मकेन्द्राणां च उपयोगः कुण्डलिनीजागरणे एव भवति। योगग्रन्थेषु चक्रभेदनोपायरूपेण बन्धाः, मुद्राः, ध्यानाभ्यासादयश्च सम्यक् वर्णिताः, यतोहि एतेषां स्थितिः शरीरे कुत्र केन रूपेण विद्यते इति ध्यानाभ्यासेनैव महर्षिभिः साक्षात्कृता। एतानि चक्राणि दिव्यचेतनायाः केन्द्राणि। एतेषां स्थितिः

मेरूदण्डस्याऽन्तर्भागे सुषुम्नायां वर्ण्यते। एतेषां चक्राणां विस्तारपूर्वकं वर्णनमस्ति तत्सर्वं मया धारणाप्रकरणे शोधप्रबन्धेऽस्मिन् प्रतिपादितम्।

ध्यानस्वरूपविषये स्वामिनारायणभाष्ये ध्यानस्य सप्तमस्य योगाङ्गस्य स्वरूपं प्रदर्शयन् प्रतिपादयति –

**यत्र यत्र धारणा कृता भवेत् तत्र तत्र देशे, प्रत्ययस्य–चित्तवृत्तेः, एकतानता–एकाग्रता, तद्ध्यानं, ध्यायते स्थूलसूक्ष्मादि यत्किमपि स्वरूपं यत्र वृत्तिष्विति।**

महर्षिः पतञ्जलिमतानुसारं यस्मिन् वस्तुनि धारणा तिष्ठति तद्वस्तु पूरयितुं साधनं ध्यानमेव।

**तत्र प्रत्ययैकतानता ध्यानम्।**

ध्यानरूपस्य विस्तृतं विवेचनं प्रबन्धस्यास्य तृतीयेऽध्याये प्रतिपादितम्।

अध्यायेऽस्मिन् समाधिस्वरूपमपि प्रतिपादितम्। श्रीकृष्णवल्लभाचार्येण सभेदं समाधिस्वरूपं वर्णितम्।

ध्यानं प्रत्ययात्मकं यदा अर्थमात्रनिर्भासं ध्येयविषयाकारेणैव साक्षिणी निर्भासते न तु प्रत्ययाकारेण, तदा 'अहमिदं चिन्तयामि' इत्येवं रूपस्य वृत्त्यन्तरस्योदयो न भवति, अतएव वृत्त्यन्तररहितं स्वस्य स्वरूपशून्यमिव भवति– ध्येयस्वरूपाकारमात्रं भवतीति, तदा ध्यानमेवेदृश्यवस्थाय समाधिरित्युच्यते, सम्यग् आधीयते ध्येयं यत्र वृत्तिविशेषे सः समाधिरिति, तथा च ध्यातृध्येयध्यानानीतिस्वरूपत्रयनिर्भासकं ध्यानम्,

ध्यातृध्येयध्यानानीतिस्वरूपत्रयरहित: समाधिरिति। अत्र भाषाशैली शब्दविन्यासञ्च सारगर्भिमस्ति।

शोधप्रबन्धस्यास्य तृतीयेऽध्याये धारणाध्यानसमाधिस्वरूपं मया अत्र लिखितम्। सहैव संयमस्वरूपविमर्शोऽपि प्रतिपाद्यते। धारणाध्यानसमाधिनां वर्णनं द्वितीयेऽध्याये मया प्रत्यपादि। यथा पातञ्जलयोगदर्शने धारणाविषये लिखितं तथैवात्र नैव उपलभ्यते। अत्र धारणया सह षट्चक्राणां विवरणं प्राप्यते।

**प्रथमम्** – योनिपीठे मूलाधारनामकं चक्रं चतुर्दलकमलं विद्यते, तत्र गणेशदेवस्वरूपे धारणां विदध्यात्।

**द्वितीयम्** – लिङ्गमूले स्वाधिष्ठाननामकं चक्रं षट्दलकमलं विद्यते तत्र ब्रह्मदेवे धारणां कुर्यात्।

**तृतीयम्** – नाभिप्रदेशे मणिपूरकनामकं चक्रं दशदलयुतकमलं विद्यते तत्र विष्णुधारणां सम्पादयेत्।

**चतुर्थम्** – हृदयप्रदेशे अनाहतनामकं चक्रं द्वादशदलयुतकमलं विद्यते तत्र रूद्रे धारणां निवर्तयेत्।

**पञ्चमम्** – कण्ठप्रदेशे विशुद्धनामकं चक्रं षोडशदलयुतकमलं विद्यते तत्र सदाशिवस्वरूपे धारणां समासादयेत्।

**षष्ठम्** – भ्रूमध्यप्रदेशे आज्ञाचक्रनामकं द्विदलं कमलं विद्यते तत्र विद्याशक्तिसहितपरमहंसगुरुदेवतायां धारणां कुर्यात्।

**सप्तमम्** – ब्रह्मरन्ध्रप्रदेशे सच्चिदानन्दब्रह्मनामकं सहस्रारकमलं विद्यते तत्र परब्रह्मस्वरूपं धारयेत्।

इदं शरीरविज्ञानं भगवता स्वामिनारायणे योगपिपासूनां कृते प्रस्तूयते। इत्थं षट्चक्रज्ञानं योगवार्तिके, व्यासभाष्ये, तत्त्ववैशारद्यां नैव प्राप्यते, अतएव शोधदिशा धारणाया: स्थानविशेषदैवसहितम् अत्र निरुपितमस्ति।

अध्यायेऽस्मिन् ध्यानस्वरूपमपि मया लिखितम् यत् स्वरूपं पातञ्जलभाष्ये वर्त्तते तदैवाऽत्र दृश्यते।

समाधिस्वरूपमप्यत्र विस्तरेण प्रबन्धेऽस्मन् मया प्रतिपाद्यते।

संयमविषये लिखितं यानि यमनियमासनप्राणायामप्रत्याहारादीनि बहिरङ्गानि सन्ति तानि संयमपदवाच्यानि नैव अतएव संयम इति पदे धारणाध्यानसमाधि: समुदायो ज्ञातव्यम् इति निर्दिष्ट्म्।

शोधप्रबन्धेऽस्मिन् चतुर्थाऽध्याये विभूतिविमर्श:, यौगिकविभूतय:, सिद्धिप्रदर्शनम्, सिद्धीनां प्रकार:, ध्यानविभूतय: सद्गुरुस्थानं महत्त्वञ्च प्रतिपादितम्। वैदिकवाङ्गमये या विभूतय: वर्त्तन्ते। तासाम् अंशभूतमत्र मया प्रतिपादितम्।

शुक्लयजुर्वेदमाध्यन्दनीसंहितायां चत्वारिंशत्तमेऽध्याये एकादशमन्त्रे प्रतिपादितम् –

**साभूतिं च विनाशं च यस्तद्वेदोभयं सह।**

**विनाशेन मृत्युं तीर्त्वा सम्भूत्यामृतमश्नुते।।**

यौगिकविभूतय: विषये वैदिकवाङ्गमये लिखितमस्ति ''नायमात्मा बलहीनेन लभ्य:''

गीतायामपि भगवता अविकम्प्रयोगप्राप्तये विभूतेः महत्त्वं प्रतिपादितम्।

**एतां विभूतिं च योगं च मम यो वेत्ति तत्त्वतः।**

**सोऽविकम्पेन योगेन युज्यते नात्र संशयः।।**

भारतीयसंस्कृतिसाहित्यपटस्य एकैकं तन्तुः योगिनां भक्तानां च अलौकिक चरित्रेण ओतप्रोतं वर्तते। तेषां साधना जीवनदर्शनस्य संस्कृतेः सभ्यतायाश्च अभिन्नमङ्गम्। प्राचीनकालादारभ्य ऋषीणां मनीषीणां च अलौकिकयोगजऋतम्भराज्ञानेन अस्माकं ज्ञानविद्यानये चरमोत्कर्षः लब्धः। अनेनैव अलौकिकज्ञानेनैव अस्माकम् आयुर्वेदसङ्गीतसाहित्यनाटकान्यपि निःसृतानि सन्ति। यदा साधकः ध्यानयोगेन सूक्ष्मत्वं प्राप्नोति तदा सः गुह्यतत्त्वानि प्रत्यक्षी करोति। एतेषां रहस्यानाम् उदघाटनमेव सिद्धयः सहायकाः भवति। योगी शनैः शनैः योगाभ्यासेन सर्वाणि प्राकृतानि तत्त्वानि जयति। तस्य आभ्यन्तरशक्तेरेव इदं फलम्।

सिद्धिर्प्रादुभावविषयेऽपि लिखितम् मानवमनः स्वरूपतात्यन्त शक्तिसम्पन्नोऽस्ति। मनसः चाञ्चल्येन अस्य शक्तिः विभज्यते। परन्तु चित्तैकाग्र्येण अयमेव शक्तिसम्पन्नो भवति। एकाग्रयेण स्वत एव शक्तयः प्रादुर्भवन्ति। ''सिद्धिः'' इति शब्दस्य दार्शनिकोऽर्थः कायचित्तेन्द्रियाणामाभिष्टुत्कर्षः। योगमतानुसारेण कारणचित्तं कार्यचित्तयोर्भेदेन अस्य विभेदो भवति। कारणचित्तम् आकाशवत् विभुः। कायचित्तं हि विभिन्नजीवेषु भिन्नरूपेण वर्तते। जीवानामानन्त्येन कार्येण चित्तमपि अनन्तमस्ति।

प्रबन्धेऽस्मिन् सिद्धिप्रदर्शनमपि अङ्गीकृतम्, सिद्धीनां प्रदर्शनं साधकेन न कर्त्तव्यम्। यतोहि एतासां प्रदर्शनेन एता अस्तङ्गता भवन्ति। यथोक्तं शिवसंहितायां ''भवेद्वीर्यवती गुप्ता निर्वीया च प्रकाशिता'' इति प्रदर्शनेन योगिनः पतनं सम्भाव्यते। अहङ्कारस्य पोषणं च भवति। अत एव उच्यते यत् यथा काचित् कुलीना स्त्री स्वशरीरस्य अङ्गादि वस्त्रापसरणे त्वरया तदङ्गम् आच्छादयति तथैव योगी योगशक्तिं गोपयति। करूणाभयमहापुरूषाः सद् गुरवश्च स्वशक्तिं न प्रदर्शयन्ति, परं सा स्वयमेव प्रदर्शिता भवति। ते स्वभक्तानां दुःखितानाम् आर्तस्वरम् आकर्ण्य अवश्यमेव द्रवीभूताः भवन्ति। योगैश्वर्येण आर्तेषु कृपां कुर्वन्ति दुःखानि च विधुन्वन्ति। तस्यां कृपया सत्यां महापुरूषस्य योगैश्वर्यस्य परिचयः स्वयमेव भवति। अतः महापुरूषाः स्वशक्तेः प्रयोगं जीवानां कल्याणाय कुर्वन्ति।

अध्यायेऽस्मिन् सिद्धीनां प्रकाराः अपि वर्णिता अत्र या सिद्धयः पातञ्जलयोगसूत्रे वर्त्तन्ते। ता एव भाष्यरीत्या प्रतिपादिता।

वीतरागविषये लिखितमस्ति महर्षिणा पतञ्जलिना सूत्रितम् ''वीतराग विषये वा चित्तम्''। अत्रापि व्यासभाष्यवत् श्रीकृष्णवल्लभाचार्येण प्रतिपादितम् अग्रे योग सिद्धौ सद्गुरुस्थानं महत्त्वञ्च मया प्रबन्धेऽस्मिन् प्रतिपादितम्।

शोधप्रबन्धस्यास्य पञ्चमाऽध्याये स्वामिनारायणभाष्यमाश्रित्य निरोधपरिणामः, एकाग्रतापरिणामः, अनागतं ज्ञानञ्च मया लिखितम्। चित्तस्य पञ्चभूमयः तासु पञ्चभूमिसु क्षिप्तमूढविक्षिप्तान् चित्तस्य व्युत्थानं कथ्यते। निरोधो नाम पञ्चमी

चित्तभूमि:, अर्थात् प्रकृष्टसत्त्वस्याऽङ्गितया चेतस: परिणाम इति ताभ्यां व्युत्थाननिरोधाभ्यां जनितौ यौ संस्कारौ तयोर्यथाक्रमम् अभिभवप्रादुर्भावौ यदा भवत:, तदा निरोधक्षणे चित्तस्याऽन्वयो भवति स: निरोधपरिणाम इति स्वीक्रियते।

शोधप्रबन्धस्याध्यायेऽस्मिन् स्वामिनारायणभाष्यमाश्रित्य समाधिपरिणाम: लिखितम्। समाधे: प्राक् चित्तभूमीनां क्षयोदयो भवति। सर्वार्थता अर्थात् विक्षिप्तता-एकाग्रता एक मात्रविषयता तयो: यथाक्रमो क्षयोदयो चित्तस्य समाधिकालिन: परिणामो भवति।

प्रबन्धेऽस्मिन् एकाग्रतापरिणाम: अङ्गीकृतम् चित्तं शान्तमूढश्च वृत्तिविशेष: एता वृत्तय: यदा तिरोभूता: भवन्ति तदा शान्ता: व्यपदिश्यन्ते। यदा प्रादुर्भूता: भवन्ति तदा उदितनाम्ना व्यवह्रियन्ते। तिरोभूतेनाऽत्र स्पष्टीक्रियते तिरोभूते वृत्तिविशेषे चित्तं स्वस्थं समाहितं सदृशप्रवाहं विशारदं भवति तथा प्रादुर्भूतेऽपि वृत्तिविशेषे स्वस्थं समाहितं चित्तं एकाग्रं य भवति तत् चित्तस्यैकाग्रता परिणाम नाम्ना इत्युच्यते।

अध्यायेऽस्मिन् अनागतज्ञानमपि मया लिखितम् अत्र भाष्ये लिखितमस्ति धर्मलक्षणाऽवस्थाख्येषु संयमाद् अतीताऽनागतं ज्ञानं योगिनो भवति, त्रयमेकत्र संयमेन योगी अतीताऽगतवस्तुं साक्षात् क्रियते। योगी यदा वर्तमाने यत्र कुत्रापि वस्तुनि धारणाध्यानसमाध्यात्मकं संयमं करोति तदा तद्वस्तुन: अतीतधर्मलक्षणाऽवस्थाविषयं भविष्यद्धर्मलक्षणावस्थाविषयकं च ज्ञानमुत्पद्यते, भूतकाले कीदृशं तदासीद् भविष्यत्काले च कीदृशं भावीति सर्वमपि जानाति, यत्र यत्र तत्त्वादौ संयमं करोति

तस्य तस्य त्रिकालस्थितिविषयकं ज्ञानं भवतीति, तेन संयमेन योगी अतीताऽनागतं ज्ञानं लभते। अस्मिन् ब्रह्माण्डे यावतां पदार्थानां जन्मस्थितिज्ञानं सम्पद्यते, अनेन सर्वभूतरुतज्ञानमपि प्राप्नोति योगी।

शोधप्रबन्धस्यास्य षष्ठाध्याये स्वामिनारायणभाष्यमाश्रित्य: सर्वभूतरुतज्ञानम् परचित्तज्ञानमन्तर्ध्यानम्, भुवनज्ञानम्, आवरणज्ञानं, स्वर्गलोकादिनां विवरणञ्च विस्तृतरेण मया प्रतिपादितम्। शोधप्रबन्धेऽस्मिन् सर्वभूतरुतज्ञानमङ्गीकृतम् यत् शब्दार्थप्रत्ययस्य च परस्परं अध्यास्य कारणं संकर: अर्थात् य: वाचकशब्द: सैवार्थ: सैव ज्ञानम्। अनेन अभिन्नताया: ज्ञानं भवति। एतस्मिन् प्रविभागे संयमेन प्राणै: उच्चरितशब्दानां अर्थस्य ज्ञानं भवति।

परचित्तज्ञानमन्तर्ध्यानविभूत्यो: विषये मया लिखितम् यत् परचित्तज्ञानमन्तर्ध्यानविभूत्यो: कारणविमर्श: अपरेषां चित्तं संयमस्य लक्ष्ये निर्धारिते सति अन्यचित्तस्य ज्ञानं भवति।

## प्रत्ययस्य परचित्तज्ञानम्।

सूत्रे प्रयुक्तं "प्रत्ययस्य" इति शब्दं गृहीत्वा नारायणभाष्यानुसारेपि प्रत्ययस्य - परचित्तस्य अर्थोगृहीत:। परचित्तसंयमेन योगी विविधविषयकं परचित्तं जानातीति, परमनोरथान् विजानात्यतो योगी अन्तर्यामीति आख्यायते।

अध्यायेऽस्मिन् भुवनज्ञानमपि मया प्रतिपाद्यते सूर्यदेव संयमेन यत्र यत्र सूर्यरश्मिय: व्याप्नुवन्ति तत्तद्भुवनस्थानां यावतां पदार्थविशेषाणां ज्ञानं भवति, अत्र सप्तलोकान् ज्ञात्वा अधिपतिसहिता: वर्णिता: - प्रजापतिसंयमात् - महर्लोकज्ञानम्। जनतप:

सत्यलोकज्ञानं ब्रह्मणि संयमात्। अतलसुतललोकज्ञानं बले संयमात्, वितललोकज्ञानं हरे संयमात्। महातलरसातलपातालज्ञानं शेषनागे संयमादितिबोध्यम् भवति। शोधप्रबन्धेऽस्मिन् आवरणज्ञानस्य विषयमपि मया प्रतिपादितमस्ति-

**आवरणज्ञानं तत्र तत्र संयमात्।**

अस्य सूत्रस्य वर्णनं पातञ्जलयोगसूत्रस्य अन्येषु ग्रन्थेषु यथा- व्यासभाष्ये, तत्त्ववैशारद्यां भोजवृत्तेश्च नैव प्राप्यते। अस्मिन् सूत्रे दशगुणाः विद्यन्ते। पञ्चभूतात्मकं सृष्टेः वर्णनं विद्यते। प्रथमं पृथिव्याः आवरणं निगद्यते। तत्र पृथिव्याः आवरणं पञ्चाऽबुर्द्धपरिमितब्रह्माण्डस्योपरि ततो दशगुणं पञ्चवृन्दयोजनायामो विद्यते, तत्र शब्द-स्पर्श-रूप-रस-गंधगुणयुक्तं पृथिव्याः आवरणं भवति, अनन्तरं द्वितीयतत्त्वं जलावरणमस्ति। तत् जलतत्त्वं दशगुणाधिकं वर्त्तते। तदुपरि तेजतत्त्वस्यावरणं वर्त्तते। तस्य परमितः जलतो दशगुणमधिकं वर्त्तते। तदुपरि चतुर्थतमः तत्त्वं वायुरस्ति। तदुपरि पञ्चमं तत्त्वं महदाकाशवर्णनं वत्तते। तच्च वायु तु दशगुणं पञ्चयोजनायां संस्थितम्। अनेन क्रमेण पृथिव्यादि पञ्चतत्त्वेषु संयमात् ब्रह्माण्डस्य ज्ञानं भवति।

शोधप्रबन्धस्यास्य सप्तमे अध्याये ताराव्यूहज्ञानम्, पुरुषज्ञानम्, विवेकजज्ञानम्, कैवल्यविमर्शः मया प्रतिपादितः।

शोधप्रबन्धेऽस्मिन् ताराव्यूहज्ञानमङ्गीकृतम् यत् यदा योगी साधकः दीर्घकालात् नियमिताभ्यासपूर्वकं चन्द्रमसौ संयमं करोति, तदा कः नक्षत्रः कस्मिन् स्थितिविशेषे

कस्मिन् स्थलेऽवस्थितः वर्त्तते तथा नक्षत्राणां व्यूहः एञ्वच विशिष्टसंन्निवेशादि स्थिति भवति। अस्य यथावत् सम्यक् रूपेण ज्ञानं भवति।

शोधप्रबन्धेऽस्मिन् पुरुषज्ञानस्य विषये मया लिखितम् यत् सत्त्वनाम प्रकृतेः परिणामो शुद्धबुद्धिरिति। पुरूषो नाम भोक्ताधिष्ठाता चेतनः। स्वयंप्रकाशे स्वरूपे संयमाद् योगिनः स्वात्मस्वरूपज्ञानवानो भवति।

संयमस्य परमफलं पुरुषज्ञानमेवास्ति। अत्यन्तभिन्नायाः बुद्धेस्तथा तदत्यन्तभिन्नस्य पुरुषस्याभिन्नत्वेन ज्ञानं भोगः। स च भोगः बुद्धेः परार्थत्वात् दृश्यो भवति। तस्माद् भोगरूपज्ञानाद् भिन्नं स्वार्थज्ञानम्। तच्च पुरुषविषयक्रम तत्र प्रत्यये संयमात् पुरुषज्ञानं भवति।

अध्यायेऽस्मिन् विवेकजज्ञानमपि लिखितम् यथा सूक्ष्मतायाः पर्यन्तं द्रव्यं परमाणुः कथ्यते, तथैव अत्यन्तसूक्ष्मतां प्राप्तः कालः क्षणमिति कथ्यते। अथवा यावतिकाले एकः परमाणुः गच्छन् प्रथमं स्थानं त्यक्त्वा अपरं स्थानं प्राप्नुयात् स समयः क्षणमस्ति। तस्य क्षणस्य धारायाः अविच्छिन्नं रूपं क्षणक्रमोऽस्ति। क्षणे सहैव न तिष्ठतः। तथा क्रमोऽपि युगपद्स्थितस्य क्षणोदयस्य न भवति। क्षणे तस्य क्रमे च कृतेन संयमेव विवेकजं ज्ञानं जायते।

शोधप्रबन्धस्यास्मिनैवाध्याये कैवल्यपरिभाषा मया लिखिता। प्रथमपादस्य तृतीये सूत्रे ''तदा द्रष्टुः स्वरूपेऽवस्थानम्'' इत्यनेन कैवल्यावस्थायाम् आत्मनः स्वरूपं च निरूपितम्।

द्वितीये पादे पञ्चविंशतितमे सूत्रे सूत्रकारेण तदभावात्संयोगाभावो हानं तद् दृशेः कैवल्यम् इत्युक्त्वा कैवल्यस्वरूपं निरूपितम्।

तृतीयपादेऽपि "तद्वैराग्यादपि दोषबीजक्षये कैवल्यं सत्त्वपुरूषयोः शुद्धिसाम्ये कैवल्यमिति" इति द्वाभ्यां सूत्राभ्यां कैवल्यस्वरूपं प्रतिपादितं वर्तते।

चतुर्थे पादे अन्तिमे सूत्रे "सत्त्वपुरूषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति" इत्युक्त्वा कैवल्यस्वरूपं प्रतिपादितम्।

कैवल्यं हि योगस्य मुख्यम् उद्देश्यम्। अतः प्रति पादे शब्दभेदेन कैवल्यस्य निरूपणं भाष्यकारेण कृतम्। सर्वतः प्राक् चित्तवृत्तिनिरोधस्य मुख्यफलरूपेण स्वरूपावस्थितिः मोक्षावस्था वा इति सूचिता। अन्येषु पादेषु एवमेव सर्वत्र साधकः मुख्यम् उद्देश्यं न विस्मरेत् इति कृत्वा कैवल्यस्य सर्वत्र निरूपणं कृतम्, येन कैवल्यस्वरूपं स्फुटो भवेत्। तथा साधकः सिद्धीः प्राप्य: कैवल्यं न विस्मरेत। यतोहि यदि साधकः सिद्धिषु लिप्यते तदा तस्य पतनं जायते। कैवल्यलाभो न भवति। अतः पौनःपुन्येन कैवल्यस्य स्वरूपं सूत्रकृता ग्रन्थारम्भादेव स्फुटीकुर्वन् अन्तेऽपि ग्रन्थपरिसमाप्तौ कैवल्यस्वरूपव्याख्यापरं सूत्रं सूत्रितमिति शम्।

इत्थं मया सप्ताऽध्यायेषु यत् किञ्चदपि शोधप्रबन्धे लिखितम् तत् साररूपेणात्र प्रतिपाद्यते।